## शास्त्रीद्वितीयवर्षम्

## षष्ठपत्रम्- फलितज्योतिषम्

## शैक्षिकनिष्पतिः

**पाठ्यग्रन्थौ-** भुवनदीपकः गोलपरिभाषा च।

**उद्देश्यम्- भुवनदीपकग्रन्थस्याध्ययनेन छात्राः-**

- प्रश्नकुण्डल्यानुरोधेन तात्कालिकशुभाशुभफलनिर्धारणे समर्था भविष्यन्ति।
- प्रश्नकुण्डलीनिर्माणे समर्था भविष्यन्ति।
- मूकप्रश्नानां समाधाने समर्था भविष्यन्ति।
- जयपराजय- गमागम-विवाह-सन्तति-जीवनमृत्यु-रोगादितात्कालिकशुभाशुभप्रश्नानां समाधाने समर्था भविष्यन्ति।

**उपयोगिता-** प्रश्नकुण्डलीनिर्माणं, तात्कालिकप्रश्नानां शुभाशुभफलज्ञानञ्च।

**गोलपरिभाषाग्रन्थस्याध्ययनेन छात्राः-**

- गोलीयक्षेत्राणां परिभाषा ज्ञाने समर्था भविष्यन्ति।
- खगोलीयावयवानां ज्ञाने समर्था भविष्यन्ति।
- आकाशगतध्रुवकदम्बादिबिन्दूनां स्थितिज्ञाने समर्था भविष्यन्ति।
- उत्तरदक्षिणगोलायनादिज्ञाने समर्था भविष्यन्ति।
- इष्टस्थानीयाक्षांशलम्बांशयोर्ज्ञाने समर्था भविष्यन्ति।

**उपयोगिता-**

- कल्पनाशक्तेः विकासः।
- साक्ष-निरक्षप्रदेशानां, सुमेरुकुमेरुभूगोलीयक्षेत्राणां च ज्ञानम्।
- आकाशीयपिण्डानां , खगोलीयक्षेत्राणाञ्च अध्ययनम्।